CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

# हरिहर स्वधर्म.

कर्ता-दंडीस्वामी श्रीअच्युताश्रमजी.

सत्यं च धर्मं च पराक्रमं च भूतानुकंपां प्रियवादितां च ॥
द्विजातिदेवातिथिपूजनं च पंथानमाहुस्त्रिदिवस्य संतः ॥

---

परस्त्री मातेव क्वचिदपि न लोभः परधने
न मर्यादाभंगः क्वचिदपि न निःशेष्वपि रतिः ॥
रिपौ शौर्यं धैर्यं विपदि विनयः संपदि सदा
इदं भरत भ्रातर्वच्मो तज्ज्ञास्यसि सदा ॥

छपावी प्रसिद्धकर्त्ता

गणपतराव रामभाऊ चौबळ—नगरहवेली.

---

गुजराती प्रिंटिंग प्रेस-मुंबई.

संवत् १९६५, सन १९०८.

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

३/२५१

# हरिहर स्वधर्मभक्तिरहस्यप्रारम्भः

॥ ॐ नमो भगवते वासुदेवाय ॥

ॐ मिति ज्ञानमात्रेण रागाजीर्णेन जीर्यतः ॥
कालनिद्रां प्रपन्नोस्मि त्राहि मां मधुसूदन ॥ १ ॥
न गतिर्विद्यते नाथ त्वमेव शरणं प्रभो ॥
पापपंके निमग्नोऽस्मि त्राहि मां मधुसूदन ॥ २ ॥
मोहितो मोहजालेन पुत्रदाराधनादिषु ॥
तृष्णयापीड्यमानोऽस्मि त्राहि मां मधुसूदन ॥ ३ ॥
भक्तिहीनं च दीनं च दुःखशोकातुरं प्रभो ॥
अनाश्रयमनाथं च त्राहि मां मधुसूदन ॥ ४ ॥
गतागतेन शान्तोऽस्मि दीर्घसंसारवर्त्मसु ॥
येन भूयो न गच्छामि त्राहि मां मधुसूदन ॥ ५ ॥
बहवो हि मया दृष्टा योनिद्वारा पृथक् पृथक् ॥
गर्भवासे महद् दुःखं त्राहि मां मधुसूदन ॥ ६ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तेन देव प्रपन्नो स्मि संसारस्थितिकारकः ॥
देहि संसार मोक्षत्वं त्राहि मां मधुसूदन ॥ ७ ॥
वाचा यच्च प्रतिज्ञातं कर्मणा न कृतं मया ॥
सोहं कर्मदुराचारस्त्राहि मां मधुसूदन ॥ ८ ॥
सुकृतं न कृतं किंचिद् दुष्कृतं च कृतं मया ॥
घोरसंसारमग्नोस्मि त्राहि मां मधुसूदन ॥ ९ ॥
देहांतरसहस्रेषु अन्योन्यं भ्रमता मया ॥
तिर्यग्योनीर्मनुष्येषु त्राहि मां मधुसूदन ॥ १० ॥
वाचयामि यथोन्मत्तः प्रणमामि तवाग्रतः ॥
जरामरणभीतोऽस्मि त्राहि मां मधुसूदन ॥ ११ ॥
यत्र यत्र च यास्यामि स्त्रीषु वा पुरुषेषु वा ॥
तत्र तत्राचला भक्तिस्त्राहि मां मधुसूदन ॥ १२ ॥
द्वादशाक्षरमिदं स्तोत्रमच्युतेन प्रकीर्तितं ॥
येनेदं पठ्यते नित्यं पुनर्जन्म न विद्यते ॥ १३ ॥

इति शुभम् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्री १०८ ईश्वर मठ पुस्तकालय, वाराणसी

## ॥ ॐ नमः शिवाय ॥

मात्स्यं कौर्म्मं नारसिंहंशरीरं वाराहं वाऽनेकरूपं विधाय ॥ भक्तानां त्वं रक्षणं संचकर्थ त्यक्तं सर्वैर्मां प्रभो उद्धरस्व ॥ १ ॥ प्रह्लादं चाप्यंबरीषं ध्रुवं वा वायोः सूनुं भीषणं वा विपूर्वम् ॥ नीचान्नीचं यद्गुहं संररक्ष त्यक्तं सर्वैर्मां प्रभो उद्धरस्व ॥ २ ॥ कृष्णो भूत्वा पाण्डवान् द्रौपदीं च गोपान् गोपीरुद्धवं विप्रतोकम् ॥ म्लेच्छान् हत्वा भक्तियुक्तान् ररक्ष त्यक्तं सर्वैर्मां प्रभो उद्धरस्व ॥ ३ ॥ भूत्वा यस्त्वं सारथिः फाल्गुनस्य निन्ये ह्येनं दुर्गमं शंभुधाम ॥ युद्धाब्धेर्वा पारमेनं निनाय त्यक्तं सर्वैर्मां प्रभो उद्धरस्व ॥ ४ ॥ कामं क्रोधं लोभमात्सर्यमोहान् हत्वा घोरान् घोरभावात् कलेर्वै ॥ भीतं त्रातुं त्वं समर्थो दयालुस्त्यक्तं सर्वैर्मां प्रभो उद्धरस्व ॥ ५ ॥ श्रीमत्परमहंसश्रीपरिव्राजकदैशि-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कैः ॥ पंचकं रचितं विष्णोर्यतीन्द्रैरच्युताश्रमैः ॥६॥
इति शुभम् ॥ शातिः ॥ शांतिः ॥ शांतिः ॥

— —

## ॥ ॐ नमः शिवाय ॥

आश्चर्यमाश्चर्यमहोगतागतं कृत्वा स्वकृत्येन सहस्रयोनिषु ॥ लब्ध्वा ध्रुवे जन्ममृती न हा हरिं हरं जनश्चिन्तयते कदापि ॥ १ ॥ आश्चर्यमाश्चर्यमिदं जगद्ध्रुवं मत्वाऽतिरागादिपरायणो जनः ॥ यमालयं याति कुकर्मकृद्धरिं हरं न हा चिन्तयते कदापि ॥ २ ॥ आश्चर्यमेतद्धि विचित्रकर्मभिर्मनुष्येषु देवेष्वधरूर्ध्वमन्तः ॥ संसारचक्रे भ्रमतीह नो हरिं हरं जनश्चिन्तयते कदापि ॥ ३ ॥ आश्चर्यकं सर्वगतं विशुद्धं ज्योतिः स्वयं श्री पुरुषोत्तमं शिवम् ॥ गुणैर्विकारैरसता विकल्पनैर्हीनं भिया चिन्तयते न नाऽपरम् ॥ ४ ॥ आश्चर्यं सकलं विनश्वरमिदं दुःख्यंगमेतत्पुनर्विष्ठाकीटकभस्म

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रूपि तदपि श्रीराज्यमन्तः पुनः॥ रूपादीन् बहुमान-
यन्तईतरेष्वाधाय नो सौहृदं रागेणाशुभवे पतन्ति
न हरिं नो चिन्तयंते हरम् ॥ ५ ॥ आश्चर्यं कलि-
काल आगत इतोवर्णाश्रमाचारनुद् यस्मिन् सर्व
प्रजासु सत्यमनघं शीलं स्वधर्मो दया॥शान्तिर्दान्ति
स्थार्जवं ह्यवगतं सौहार्दलेशो न वा किंत्वद्यापि
हरिं हरं न मनुजा हा चिन्तयंते कदापि ॥ ६ ॥
आश्चर्यकं श्रौतस्मार्तविमुक्तिमार्गं हित्वा मतं
कल्पितमाश्रयंतः ॥ अधः पतन्तो न जना हरिं
हरं मोक्षप्रदं हा हृदि चिन्तयन्ति ॥ ७ ॥ हरौ हरे
तीक्ष्णकरे गणेशे शक्तौ न भेदो जगदादिहेतुषु ॥
अधःपतंत्येषु भिदादधानो वदंत्यलं श्रीयतिरच्यु-
ताश्रमाः ॥८॥ इति शुभम्॥शांतिः॥शातिः॥शांतिः॥

---

## ॥ ॐ नमः शिवाय ॥

रुद्राक्षतुल्यं च विभूतितुल्यं न भुक्तिमुक्त्योर्जन-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नाय किंचित् ॥ पित्रोः प्रियं तच्छिवयोस्त्रिलोक्या-
स्तौ रक्षतां मां शरणागतं द्रुतम् ॥ १ ॥ अनन्यभक्त्या
परितुष्य विष्णवे योऽदत्तचक्रं च सुदर्शनाभिधम् ॥
अजेयदैत्यं त्रिपुरं जघान सो मां पातु शंभुः शर-
णागतं द्रुतम् ॥ २ ॥ अशेषजीवा अपि मुक्तिभाजो
येस्थानकाश्यां च सदाऽनुरक्ताः ॥ दुण्ढ्यन्नपूर्णा
द्युनदीषु भैरवा मां पातु शंभुः शरणागतं द्रुतम् ॥
॥ ३ ॥ आराध्य रामेण हतोऽथ लंकेश्वरो मुकुन्देन
समस्तसंपदः ॥ प्राप्तो विरोधादथ दक्षनाशो मां
पातु शंभुः शरणागतं द्रुतम् ॥ ४ ॥ सोमेशरामे-
श्वरभीमशंकरा ॐ कारवैद्येश्वरमल्लिकार्ज्जुनाः ॥
नागेशविश्वेश्वरकालत्र्यम्बकाः केदारः पायाद् घृष्णे-
शोमामिह ॥ ५ ॥ मा पातु शंभुः शरणागतं द्रु-
तम् ॥ श्रीमत्परमहंस श्रीपरिव्राजकदैशिकैः ॥पंचकं
रचितं शंभोर्यतीन्द्रैरच्युताश्रमैः ॥ ६ ॥

---

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

## ॥ ॐ नमः शिवाय ॥

श्रौतस्मार्तपथं विहाय निरतान् पाखण्डिनव्ये मते दृष्ट्वाऽसंख्यजनान् दयालुरधुना वर्णाश्रमाभ्यां गतान् ॥ पाखण्डं हठतो निरस्य च पुनः श्रौतं व्यतानीन्मतं तं वन्दे शिवरूपमच्युतयतिः श्री १००८ माधवं शंकरम् ॥ १ ॥ श्रीशारदापीठविराजमानं जगद्गुरुं शंभुसमप्रधानम् ॥ कोटिप्रणामान्कुरुतेऽच्युताश्रमः श्रीशंकरं माधवदैशिकं प्रति ॥ २ ॥ किं शंकराचार्य इयेष माधवतीर्थस्वरूपेण जगत्यनुग्रहम् ॥ पाखण्डिरूपत्रिपुराऽसुरार्दनं मन्ये सदैवं यतिरच्युताश्रमः ॥ ३ ॥ सर्वान् प्रत्यधुना सनातनमते मन्दान् वदाम्यच्युतः श्रीमच्छंकरदेशिकाखिलगुरोरेषः प्रयत्नो महान् ॥ मन्तव्यो बहुलादरेण नृपतिभिर्मान्यैर्महद्भिर्नरै स्तेन तान् प्रतिवासरन्तु भवतां मांगल्यमत्युच्छ्रितम् ॥ ४ ॥ अर्थान् दधाना चतुरः प्रधाना श्रीमाधवश्लोक

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चतुष्टयीयम्॥विनिर्मिता सा यतिनाऽच्युताश्रमेणाऽस्त्यर्पिता विश्वगुरोः पदाब्जयोः ॥ ५ ॥

---

## ॥ ॐ नमः शिवाय ॥

तत्त्वमस्यादि षडंगशास्त्ररहस्यमंतं यतिमण्डलीनाम् ॥ निवेशयन्तं यतिरच्युताश्रमो गुरु विवेकाश्रममानतोऽस्मि ॥ १ ॥

---

## ध्यानम्-निर्गुण सगुण

अचिन्त्यमव्यक्तमनन्तरूपं शिवं प्रशान्तममृतं ब्रह्मयोनिम् ॥ तमादिमध्यान्तविहीनमेकं विभुं चिदानन्दमरूपमद्भुतम् ॥ १ ॥ उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तम् ॥ ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं तमसः परस्तात् ॥ २ ॥

ॐ नमः कृष्णाय शुद्धाय ब्रह्मणे परमात्मने ॥ योगेश्वराय योगाय त्वामहं शरणं गतः ॥ ३ ॥

---

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

समाप्त.

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri